वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

अर्थद्योतनिकाटीकाधारेण अभिज्ञानशाकुन्तलस्य रससमीक्षा

डॉ. हरीशचन्द्रः की. भट्टः[१]

कविकुलगुरुकालिदासस्य अभिज्ञानशाकुन्तलं संस्कृतजगति नाटकेषु सर्वदा सर्वथा ख्यातिं भजते। बहुभिः पौर्वर्त्यपाश्चात्यविद्वद्भिरपि ग्रन्थस्यैतस्योपरि बह्व्यः टीकाः प्रतिपादिताः सन्ति। यतो हि नाटकमिदं श्रृङ्गारप्रधानमस्ति अतः टीकासु श्रृङ्गारस्य प्राधान्यमस्ति। मुख्याः टीकाकाराः शकुन्तलादुष्यन्तयोः श्रृङ्गाराय महत्वं प्रदत्तवन्तः। बह्वीषु टीकासु श्रृङ्गारं विहाय अन्यरसेभ्योऽपि महत्वं प्रदत्तमस्ति।

अर्थद्योतनिकाटीकागुजराते प्रसिद्धा नास्ति। अत: कार्यमिदं मया स्वीकृतमस्ति। अभिज्ञानशाकुन्तलस्य अर्थद्योतनिकाटीकाकर्तारः राघवभट्टाचार्याः सन्ति। अर्थद्योतनिकाटीकायां राघवाचार्येण रुय्यकादीनां बहूनां विदुषां मतानि उररीकृतानि सन्ति। एतस्या: टीकाया: पठनेन लक्षणग्रन्थानां सरलतया ज्ञानं भवति। स्वगता सद्दशानां छन्दसां ज्ञानमित: प्राप्तुं शक्यते। बहूनां कोशग्रन्थानामध्ययनं राघवभट्ट: अकरोदिति तस्या अभ्यासेन ज्ञायते।

मुखाद्या: पञ्चसन्धय: राघवाचार्या: अकुर्वन्। संक्षेपेण टीकाया: विषये लिखामि चेत् राघवभट्टस्य अर्थद्योतनिकाटीकानावं समारुह्य य: कोऽपि अभिज्ञानशाकुन्तलं तर्तुमिच्छति स: पारं यातुं शक्नोति।

अतोऽत्र अस्या: टीकाया आधारेण श्रृङ्गारं विहाय अन्यरसानां परिशीलनं विहितमस्ति।

- **अर्थद्योतनिकाटीकाधारेणरससमीक्षा**

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं शोकमुर्व्यां प्रयाति॥[२]

ग्रीवाभङ्गा– रसभावादितात्पर्यमाश्रित्य विनिवेशनम्। अत्र भयानको रसो व्यङ्ग्यः। तस्य मृगगतं भयं स्थायिभावः। दुष्यन्ताधिष्ठित स्यन्दनालोकनमालम्बनविभावः। तदनुपतनशरपतनौत्सुक्यादीन्युद्दीपन-विभावः। ग्रीवाभङ्गार्धभक्षिततृणस्खलनशुष्कौष्ठकण्ठत्वमुख-वैवर्ण्यशरीरसंकोचाश्चञ्चलादयोऽनुभावाः। त्रासश्रमवेगादयो व्यभिचारिणः। कम्पादयः सात्विकाः। अनेनात्र भयानको रसः व्यज्यते।[३]

---

[१] प्रधानाचार्यः, श्रीनर्मदासंस्कृतवेदपाठशाला, तपोवनसंकुलम्, भरुच, मो. ९९२५२२०२३४

[२] अभिज्ञानशाकुन्तले– श्लोकः ७, अङ्कः १.

[३] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् १७

तीव्राघात-प्रतिहततरु-स्कन्धलग्नैकदान्तः
पादाकृष्टव्रततिवलयासङ्ग-सञ्जातपाशः।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः॥[४]

तीव्राघातप्रतिहततरुः-अत्रापि भयानको रसः। गजगतभयं स्थायिभावः। दुष्यन्तसेनारथावलोकनं विभावः। पार्थावलोकनपलायनादयो व्यभिचारिणः अनेनात्र भयानको रसः।

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोमि।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनुरिति मुहुः केवलं राजपूर्वः॥

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरूहूते च वज्रे॥[५]

अध्याक्रान्ता एवं नैतच्चित्रमित्यत्र आभ्यां युद्धवीरो ध्वन्यते। तल्लक्षणं तु

अविस्मयादसंमोहादविषादाच्च यः सताम्।
धर्माद्यर्थविशेषेषु कार्यतत्त्वविनिश्चयः।
तपश्च विनयः कीर्तिः पराक्रमणशक्तिता।

इत्यादयः विभावाः स्युः।

युद्धवीरेहर्षगर्वामर्षाद्याव्यभिचारिणः।
असहायेऽपि युद्धेच्छा समरादनिवर्तनम्॥
भीताभयप्रदानाद्या अनुभावाः प्रकीर्तिताः।
उत्साहःस्थायिभावश्च धीरावीरं बभाषिरे॥

अत्र विभावानुभावावुपनिबद्धौ। व्यभिचार्यादयः स्वयमूहनीयाः। अनेन अत्र वीरो रसः।[६]

---

[४] अभिज्ञानशाकुन्तले– श्लोकः ३२, अङ्कः १.

[५] अभिज्ञानशाकुन्तले– श्लोकः १४-१५, अङ्कः २.

[६] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् 78-79

विदूषकः – त्रिशंकुरिवान्तराले तिष्ठ इत्यत्र विदुषकवचनेषु हास्यप्रतीतिः स्फुटैव। उक्तं च-

विदुषकस्य हास्यं तु नायके हास्यकारणम्।

तल्लक्षणम् -

भाषणाकृतिवेषाणां क्रियायाश्च विकारतः।
लोल्यादेश्च परस्थानामेषामनुकृतेरिति॥

विकासश्चेतसो हासः ... इति एतत्स्थायीहास्यं ज्ञेयम्।[७]

सायंतने सवनकर्मणि संप्रवृत्ते वेदीं हुताशनवतीं परितः प्रयस्ताः।
चायाश्चरन्ति बहुधा भयमादधानाः सन्ध्यापयोदकपिशाः पिशिताशनानाम्॥[८]

अत्र भयानको रसः। उक्तं च 'भये तुमन्तुनाघोरदर्शनश्रवणादिभिः। चेतस्यतीवचाञ्चल्यं तत्प्रायोनीचमध्ययोः' इति। तद्भयं स्थायिभावः। पिशिताशनच्छायावलोकनं विभावः। पद्यस्थभय'शब्देन त्रासलक्षणो व्यभिचारी। उद्दीपनभावादिकं स्वयमूहनीयम्।[९]

आचार इत्यवहितेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता प्रस्थानविक्लवगतेरवलम्बनार्था॥[१०]

औत्सुक्यस्य भावः वर्णितोऽस्ति। तद्यथा-
कालाक्षमत्वमौत्सुक्यमिष्टवस्तुवियोगतः।
तदर्शनाद्रम्यवस्तुदिदृक्षोदेश्च -इति।

ननु अत्र औत्सुक्यलक्षणस्य भावस्य शब्दवाच्यत्वं दोष इति चेन्न अत्र न तथा विभावादेः औत्सुक्यप्रतीतिर्यथा पुनरौत्सुक्यग्रहणात्। एतदभिप्रायेणैव 'न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित् इत्युक्तम्। अत्र 'प्रस्थानविक्लवगतेः' इत्यनेन औत्सुक्यस्य ग्रहणं भवति।[११]

अत्राङ्कान्ते नेपथ्यादारभ्य राजा- वेत्रवतिपर्याकुलोऽस्मि। इत्यत्र- 'नेपथ्ये' इत्याद्ये तदन्तेन शक्तिर्नामाङ्गमुपक्षिप्तम्। तल्लक्षणं तु -

विरोधप्रशमो यस्तु सा शक्तिरिति कीर्तिता। इति

---

[७] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् 83

[८] अभिज्ञानशाकुन्तले– श्लोकः २४, अङ्कः ३.

[९] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् 117

[१०] अभिज्ञानशाकुन्तले– श्लोकः ३, अङ्कः ५.

[११] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् 159

अनेन अद्भुतरसोऽपि ध्वनितः। तल्लक्षणं तु -

दुर्लभाभिष्टसंप्राप्तिः खेचराणां विलोकनम्।
एते यत्र विभावाः स्युरनुसंचारिणस्त्वमी॥
स्तम्भः स्वेदश्च रोमाञ्चः प्रलयो गद्गदं वचः।
आवेगसम्भ्रमौजाड्यमिति यत्राथ विस्मयः॥

स्थायीतमद्भुतं प्राह .... इति। अनेन अद्भुतरसस्य प्रभवोऽत्र अनुमीयते।

एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम्।
आर्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्य शरणं भवत्वदानीम्॥[१२]

इति श्लोके अभिनवकण्ठशोणितशार्दूलः चेष्टमानमितस्ततो पशुमिवैषवाहन्मि। अनेन बीभत्सरसो ध्वन्यते।[१३]

(नेपथ्ये) अविहा अविहा। इत्यत्र रौद्रो रसो ध्वन्यते। तल्लक्षणं तु -

हन्तृप्रकृतयोरक्षोदैत्याद्यन्यायकारिणः।
जिघांसाद्याश्च यत्रास्युर्विभावाः परिकीर्तिताः॥
भावाः संचारिणः स्थायी क्रोधोरौद्रोऽभ्यधायिसः॥ इति।[१४]

उपसंहारः

अनेन प्रकारेण रसमवलम्ब्य कार्यं मयात्र विहितमस्ति। यतो हि प्रत्येकस्य अङ्कस्य समाससमीक्षा-अन्वयसमीक्षा-कोशसमीक्षा-अलङ्कारसमीक्षा-ध्वनिसमीक्षा-व्याकरणसमीक्षा अवशिष्टाः सन्ति। एतेषु विषयेष्वपि कार्यं करणीयं भवति। अत्र अस्या: टीकाया आधारेण शृङ्गारं विहाय अन्यरसानां परिशीलनं विहितमस्ति। अनेन शोधलेखाधारेण अन्येऽपिकार्येऽस्मिन् प्रवृत्ताः भविष्यन्ति इति भावनया सह...

सन्दर्भग्रन्थसूचिः

१. अभिज्ञानशाकुन्तम् – कालिदास:, व्याख्याकार: - डॉ.सुधाकर मालवीय, चौखाम्बा कृष्णदास अकादमी, वाराणसी – २०१७
२. अभिज्ञानशाकुन्तम् – कालिदास:, सम्पादक: - वस्तकुमार भट्ट, राष्ट्रियसंस्कृतसंस्थान, नवदेहली, २०१८

---

[१२] अभिज्ञानशाकुन्तले– श्लोक: २७, अङ्क: ६.
[१३] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् 232
[१४] अभिज्ञानशाकुन्तले अर्थद्योतनिकाटीकायां पृष्ठम् 233

३. काव्यप्रकाश: - मम्मट:, व्याख्याकार: - डॉ. सत्यव्रतसिंह:, चौखम्बा विद्याभवन, वाराणसी, २०१४
४. साहित्यदर्पण: - विश्वनाथ:, व्याख्याकार: - डॉ. सत्यव्रतसिंह:, चौखम्बा विद्याभवन, वाराणसी, दशम संस्करण – १९९७
५. मल्लिनाथ की टीकाओ का विमर्श – डॉ. प्रभुनाथ द्विवेदी, चौखाम्बा पब्लीशर्स, वाराणसी, २००८
६. काव्यमीमांसा – राजशेखर:, व्याख्याकार: - डॉ. श्रीकृष्णमणि त्रिपाठी, चौखाम्बा सुरभारती प्रकाशन, वाराणसी -२०१६
७. चन्द्रालोक: - जयदेव:,व्याख्याकार: - डॉ. श्रीकृष्णमणि त्रिपाठी, चौखाम्बा सुरभारती प्रकाशन, वाराणसी -पुनर्मुद्रित - २०००
८. वक्रोक्तिजीवितम् – कुन्तक:, व्याख्याकार: - श्री राधेश्याम मिश्र, चौखाम्बा संस्कृत संस्थान, वाराणसी, पञ्चम संस्करण – २००१
९. बृहद्कोश – संपादक प्रा. रतिलाल सां नायक, अक्षरा प्रकाशन, अमदावाद – तृतीय आवृत्ति – २००८
१०. संस्कृत हिन्दी कोष – वामन शिवराम आप्टे, मोतीलाल बनारसीदास, वाराणसी, १९७६
११. अमरकोष – अमरसिंह – हरदत्तशर्मा तथा सार देसाई, पूना, १९४१
१२. अभिज्ञानशाकुन्तलम्, कालिदास:, चौखाम्बा संस्कृत प्रतिष्ठान, प्रकाशक- नारायण रामआचार्य, ३८, यू.ए. जवाहर नगर, बंगलो रोड, पो. बो. नं. २११३, दिल्ली – ११०००७, ई. स. २०१२

~~~~~~~~~~~
~~~~~~~~~~~